अथ श्रीवातूलनाथसूत्राणि श्रीमदानन्तशक्तिपादविरचितवृत्तिसमेतानि

१ संघट्टघट्टनबलोदितनिर्विकार शून्यातिशून्यपदं अव्ययबोधसारम्
१ सर्वत्र खेचरदृशा प्रविराजते यत्तन्नौमि साहसवरं गुरुवक्त्रगम्यम्

२ सर्वोल्लङ्घनवृत्त्येह निर्विकेतोऽक्रमाक्रमः
२ कोऽप्यनुत्तरचिद्व्योम स्वभावो जयतादजः
३ श्रीमद्वातूलनाथस्य हृदयाम्भोधिसंभवम्
३ पूज्यपूजकपूजाभिः प्रोज्झितं यन्नमामि तत्
४ येनेह सर्ववृत्तीनाम् मध्यसंस्थोऽपि सर्वदा
४ महाव्योमसमाविष्टस् तिष्ठाम्यस्मिन्निरावलिः
५ तं अपूर्वं अनावेशम् अस्पर्शं अनिकेतनम्
५ संविद्विकल्पसंकल्प घट्टनं नौम्यनुत्तरम्
६ योगिनीवक्त्रसंभूत सूत्राणां वृत्तिरुत्तमा
६ केनापि क्रियते सम्यक् परतत्त्वोपबृंहिता

इह किल षड्दर्शनचतुराम्नायादिमेलापपर्यन्तसमस्तदर्शनोत्तीर्णं अकथ्यं अपि श्रीमद्वातूलनाथस्य पीठेश्वर्योच्छुष्मपादौघं उक्त्वा तदनु परमरहस्योपबृंहितत्रयोदशकथासाकात्कारदृशा क्रमाक्रमास्तिनास्तितथ्यातथ्यभेदाभेदसविकल्पनिर्विकल्पभवनिर्वाणकलङ्कोज्झितं किं अप्यनवकाशं परं तत्त्वं सूत्रमुखेनादिशन्ति
यत्रेदं आदिसूत्रम्

१ः महासाहसवृत्त्या स्वरूपलाभः ।।

अतितीव्रातितीव्रतरविशृङ्खलशक्तिपाताघ्रातस्य स्वस्वरूपसमाविष्टस्य कस्य चित्क्व चित्कदा चिदकस्मादेव "*महासाहसवृत्त्या*" घस्मरमहाघनतरपरनादोल्लासस्फारेण सविकल्पनिर्विकल्पात्मकसमस्तसंविन्निवहघट्टनान्निरावरणमहाशून्यतासमावेशनिष्ठया
"*स्वरूपलाभः*"
समस्तकल्पनोत्तीर्णत्वादकृतकनिरवकाशनिरुत्तरनिस्तरङ्गनिरवधिनिर्निकेतास्पर्शसंवित्प्राप्तिर्भवति इति रहस्यार्थः । महासाहसवृत्त्यानुप्रवेशश्च वक्ष्यमाणकथितक्रमेणाधिगन्तव्यः ।।

झटिति सर्वोल्लङ्घनक्रमेणानिकेतस्वरूपप्राप्तिसाक्षात्कारमहासाहसचर्चासंप्रदायं निरूप्य, इदानीं तत्रैव सर्ववृत्तिमहासामरस्यं एककाले प्रचक्षते

२ः तल्लाभाच्छुरिता [युद्?]युगपद्वृत्तिप्रवृत्तिः

वृत्तीनां दृगादिमरीचिरूपाणां तथा रागद्वेषाद्युन्मेषवतीनां "*युगपत्*" तुल्यकालं क्रमपरिपाट्युल्लङ्घनेनाक्रमप्रवृत्त्या "*तल्लाभाच्छुरिता*" ततेन प्रागुक्तमहासाहसदशासमावेशक्रमप्राप्येण स्वरूपलाभेन कालाकालकल्पनोत्तीर्णालंग्रासवपुषा महानिरीहेणाच्छुरिता स्पृष्ता स्वस्वरूपतां नीताल्"*प्रवृत्तिर्*" प्रकर्षेण वर्तमाना वृत्तिर्सततं अच्युततया तत्समावेशावस्थानं इत्यर्थः । इत्यनयोक्तिभङ्ग्या सर्ववृत्तीनां समनन्तरं एव सर्वोत्तीर्णमहाशून्यताधाम्नि धामरूपे तन्मयतया परस्परविभेदविगलनेनोदयपदव्यां एव सततं अवस्थितिर्स्थितेत्यर्थः ।।

इत्यनयोक्तिभङ्ग्या तुल्यकालकथनोपदेशं उक्त्वेदानीं पुस्तककथां निरूपयन्ति

३ः उभयपट्टोद्घट्टनान्महाशून्यताप्रवेशः

श्रीमन्निष्क्रियानन्दनाथानुग्रहसमये श्रीगन्धमादनसिद्धपादैरकृतकपुस्तकप्रदर्शनेन या परपदे प्राप्तिरुपदिष्टा सैव वितत्य निरूप्यते । सप्तरन्ध्रक्रमोदितसप्तशिखोल्लासात्मकः प्राणप्रवाहोदयः सैवोर्ध्वपट्टकः पूर्णवृत्त्युदयः, रन्ध्रद्वयसुषिरनालिकाप्रवाहप्रसृतोऽपानरूपोऽधःपट्टकः पञ्चेन्द्रियशक्तिवेष्टितः पञ्चफणधर्मानिबन्धकोऽधःस्थितः । तस्य वलयद्वयं जाग्रत्स्वप्नात्मकं उन्मुद्र्य ग्रन्थिनिबन्धनं अपहृत्य "*उभयपट्टोद्घट्टनात्*" प्राणापानद्वयविदारणान्मध्यवर्ती यः प्राणरूपो महाशून्यतास्वभावः कुलाकुलविकल्पदशोज्झितोऽव्यपदेश्यमहानिरावरणनिरत्ययवेद्यवेदकनिर्मुक्तो वर्णावर्णनिवर्णोत्तीर्णः
स्पर्शास्पर्शप्रथापरिवर्जितोपचारात्परमाकाशाद्यभिधानैः
अभिधीयते । तत्र "*प्रवेशः*" तत्समावेशतया सामरस्यावस्थितिर्सैव प्राप्तमहोपदेशनामाविर्भवतीत्यर्थः ।।

इत्थं महानयोक्तदृशा सर्वशास्त्रप्रपञ्चोत्तीर्णात्वादवाच्यं किं अपि महोपदेशसाक्षात्कारं उभयपट्टकाकारसदसद्रूपद्वयनिवारणेन निस्तरङ्गपरव्योमसमावेशविवर्जितं आसूत्रितमहाशून्यतासमावेशं आवेद्य, इदानीं युग्मोपसंहारात्कैवल्यफलं तन्मयतोपवर्ण्यते

४ः युग्मग्रासान्निरवकाशसंविन्निष्ठा ।।

पृथिव्यादिमहाभूतपञ्चकस्यैकैकस्मिन्ग्राह्यग्राहकतया "*युग्म*" वृत्त्युदयसंव्यवस्थितिः । तत्र गन्धप्राधान्याद्धरातत्त्वस्य पायुघ्राणरूपेण द्विप्रकारता । अप्तत्त्वस्य च रसप्रधानतयोपस्थरसनारूपेणद्वैविध्यं । तेजस्तत्त्वस्य रूपप्राधान्यात्पादनेत्रभेदेन द्वयरूपता । वायुतत्त्वस्य स्पर्शप्राधान्यात्त्वक्पाणिस्वभावतो द्विधा गतिः । आकाशतत्त्वस्य शब्दप्राधान्याद्वाक्श्रोत्रभेदेन द्विप्रकारतयैव बहुधात्वं । अथवा पृथिव्यप्स्वरूपौ भोग्यस्वरूपावस्थितौ । तेजोवाय्वाख्यौ भोक्तृस्वभावौ संस्थितौ । आकाशं चैतद्युग्मान्तरस्थं सत्सुषिरतया सर्वप्रनाडिकान्तरोदितं च बहुधा विभक्तं । पृथिव्यादिवाय्वन्तं भूतचतुष्टयं भोग्यरूपं आकाशं च भोक्तृस्वभावं इति वा । भोग्येऽपि भोक्ता सदैव तिष्ठति; भोक्तर्यपि भोगः

नित्यं विभाति । एवमुक्तयुक्त्या प्रत्येकं पृथिव्यादिमहाभूतपञ्चकं युग्मेन द्वयविभूत्यानारतं प्रोल्लसतीत्यभिप्रायः । अथवा प्रत्येकं व्यक्ताव्यक्ततया बहिरन्तरतया शान्तोद्रिक्ततया वा विभाति । एतत्पञ्चकस्थानसंथितयुग्मस्य `ग्रासात्ऽऽ संहरणत्`निरवकाशसंविन्निष्ठाऽऽ निरवकाशा येयं संवित्तस्या निष्ठा सम्यगविपर्यस्ततया संथितिः । निरवकाशसंवित्त्वेन नापि सविकल्पसंविदुन्मेषैरवकाशो लभ्यते, नापि निर्विकल्पसंवित्स्वभावेन प्रवेशोऽधिगम्यते । इत्थं अप्रमेयत्वान्निरुत्तरपरमाद्वयस्वभावत्वाच्च निरवकाशसंविदिहोच्यते । तस्या निष्ठा वरगुरुप्रदर्शितदृशा सततम्
उच्यता गतिर्केषांचिद्भवतीत्यर्थः । एवं द्वयात्मककुलकौलकवलनेन निरुपाधिनीरूपनिःस्वरूपतादात्म्यं भवतीत्यर्थः । ।४ । ।

द्वयविगलनेन परतत्त्वावस्थितिं युग्मचर्चागमनिकयेहोक्त्वा, तदनु संघट्टकथासाक्षात्कारो निरूप्यते

५ः सिद्धयोगिनीसंघट्टान्महामेलापोदयः

सिद्धा च योगिन्यश्च ता सिद्धयोगिन्यो विषयकरणेश्वरीरूपा । तासां संघट्टः संगमो ग्राह्यग्राहकोभयसंश्लेषः परस्परागूरणक्रमेणालिङ्गनं । तेनालिङ्गनेन सदैव `महामेलापोदयःऽऽ महामेलापस्याहंतेदंतात्मकद्वयविगलनान्निरुत्तरचिद्व्योम्नि सततं महासामरस्यात्मकस्य सर्वत्र प्रत्यक्षतयोदयः समुल्लासो भवतीत्यर्थः । वेद्यवेदकद्वयाप्रथनप्रवृत्त्या परमाद्वयसमावेशः सर्वत्रावस्थितेत्युक्तं भवति । ।५ । ।

उभयविगलनेन सदैव महामेलापोदयं उक्त्वा, तदनु कञ्चुकत्रयोल्लङ्घनेन निरुत्तरपदप्राप्तिं कटाक्षयन्ति

६ः त्रिकञ्चुकपरित्यागान्निराख्यपदावस्थितिः

त्रिकञ्चुकस्य भाविकभौतिकशून्यभेदभिन्नस्य । तत्र भाविकं शब्दाद्यहंकारपर्यन्तं तन्मात्ररूपं, भौतिकं पृथिव्यादिरूपं, शून्यं निरीहाख्यं वासनास्वरूपं च । अथवा भाविकं घटाकारं बाह्यं ग्राह्यविषयरूपं, भौतिकं पुनोऽअन्तरं इन्द्रियात्मकं ग्रहणरूपम्, शून्यं तदुभयमध्यमाकाशं । अथवा भाविकं स्वप्नावस्था सृष्टिरुच्यते, भौतिकं जाग्रत्प्रथा स्थितिर्निगद्यते, शून्यं सुषुप्तदशा संहारोऽभिधीयते । इत्थंसंस्थितस्य त्रिकञ्चुकस्य `परित्यागात्ऽऽ सन्न्यासात्`निराख्यपदावस्थितिर्ऽऽनिर्गताख्याभिधानं
यस्यासौ निराख्योऽव्यपदेश्यं अनुत्तरं वागुत्तीर्णं परं धाम, तस्मिन्सर्वोत्तीर्णानिकेतनपरमाकाशेऽवस्थितिर्सदैवापरिच्युतस्वभावनिष्ठा भवतीति संबन्धः । ।६ । ।

इत्थं कञ्चुकत्रयोल्लङ्घनेन तुर्यपदप्राप्तिं निरूप्य, इदानीं सर्ववाक्प्रथासु निरावरणासु स्वरभूतिविजृम्भैव प्रथते सदैव, इति निरूपयन्ति

७ः वाक्चतुष्टयोदयविरामप्रथासु स्वरः प्रथते

आदौ तावद्वाक्चतुष्टयं निर्णीयते । निरावरणनिरवकाशोदयनिरुत्तरनिस्तरङ्गपरमनभस्युच्छलत्किम्चिच्चलनात्मकप्रथमस्पन्दविकासस्वभावा वर्णरचनां मायूराण्डरसन्यायेनाद्वयमहासामरस्यतयान्तोधारयन्ती परेति प्रथिता । सैव चानाहतनादस्वरूपतां अवाप्ता निर्विभागधर्मिणी समस्तवर्णोदयं वटधानिकावदन्तोधारयन्ती द्रष्टृस्वभावा पश्यन्तीति व्यपदेश्या । सैव च संकल्पविकल्पनिवहनिश्चयात्मबुद्धिभूमिं स्वीकृतवती वर्णपुञ्जं शिम्बिकाफलन्यायेनान्तोधारयन्ती मध्यमेत्यभिहिता । सैव हृत्कण्ठताल्वादिस्थानकरणक्रमेणाहता सती वर्णविभवमयश्लोकादिवद्भेदरूपं प्रकटयन्ती रूपादिसमस्तविश्वप्रथां च व्यक्ततां आपादयन्ती वैखरीत्युक्ता । इत्थं निरवकाशात्संवित्पदात्
वाक्चतुष्टयं अविरतं अनिरोधतया प्रथते । एवं ईदृक्स्वभाववाक्चतुष्टयस्योदयश्च विरामश्च तावदुदयविरामौ सृष्टिसंहारौ, तयोर्प्रथा व्यक्ताव्यक्ततया सदैवाविरतं उल्लसन्त्यः स्फुरन्त्यः, तासु `स्वरःऽऽ अनाहतहतोत्तीर्णमहानादोल्लासविकासस्वभावः `प्रथतेऽऽ सविकल्पनिर्विकल्पसंविदुत्तीर्णपरवियदुदयं एव प्रकाशितं सततं अकरणप्रवृत्त्या प्रयातीत्यर्थः । इत्थं नानाभेदोल्लासप्रकाशरूपेषु वर्णनिवहोद्वहोदयेषु मध्यात्प्रतिवर्णान्तरे वाक्चतुष्टयक्रमेणाखण्डितवृत्त्या स्वस्वरूपं अपरित्यज्य यथामुखोपदिष्टनीत्या स्वरैव प्रथते, इत्युक्तं भवति ।।७।।

इति वाक्चतुष्टयोदयक्रमेण निरावरणस्वरोदयः सर्वत्र सर्वकालं स्फुरति, इति निरूप्य, इदानीं रसत्रितयाभोगे सति परं धामैव निरुत्तरं चकास्ति, इति निगद्यते

८०ः रसत्रितयास्वादनेनानिच्छोच्छलितं विगतबन्धं परं ब्रह्म ।।

रसत्रयं गुरुमुखोदितदृशा मनागीषत्प्रकाश्यते । मूलाधारपयोधराधारप्रथिताकृत्रिमरसत्रितयाभोगे सति "*अनिच्छोच्छलितम्*" निष्कामतया प्रोल्लसितं "*विगतबन्धं*" विरहितभेदप्रथात्मकसंसारावग्रहं शान्तचित्रोभयविधब्रह्मस्वरूपसमुत्तीर्णं किं अपि निरुत्तरप्रकृष्टतरामर्शसंवित्स्वभावं "*परं ब्रह्म*" एव सततं अनस्तमितस्थित्या विजृम्भतेत्यर्थः । एतदेव रहस्यक्रमेणोच्यते । मूलाधारस्तु प्रथमप्रतिभोल्लासमहानादविशेषः सृष्टिस्वभावो भेदाभेदात्मकसंवित्पदार्थप्रथमाश्रयभित्तिमू<र्>तत्वात् । पयिधरस्तु पयः समस्ताप्यायकत्वात्सर्वाश्रयसंवित्स्वरूपं तद्
एव धारयति स्थितिप्ररोहं अवलम्बयति यः स्पन्दोऽद्योन्मेषैव सर्वपदार्थावभासनात्स्थितिरूपः । आधारस्तु जडाजडभावपदार्थोपसंहारकत्वात्प्रत्यावृत्तिसंवित्स्वभावः संहारः । एतत्त्रयोधूतं रसरूपं तत्तदनुभवचमत्कारसामरस्यं आस्वाद्य स्वात्मन्यकृतकखमुद्रानुप्रवेशाद्विमृश्य, तुर्यस्वभावो महासंहाराख्योऽनवरतं परमाद्वयतया विभातीति रहस्यार्थः ।।८

एवं निरवकाशभङ्ग्या रसत्रितयचर्चासंप्रदायं निरूप्य, इदानीं देवीचतुष्टयकथासाक्षात्कारः प्रकाश्यते

९०ः देवीचतुष्टयोल्लासेन सदैव स्वविश्रान्त्यचस्थितिः ।।

"*देवीचतुष्टयं*" क्षुत्तृडीर्ष्यामननाख्यं । तत्र च सर्वग्रासनिरतत्वात्क्षुदेव महासंहारः । सर्वशोषकत्वात्तृडेव संहारः । ईर्ष्या द्वयप्रथापादिका ग्राह्यग्राहकपरिग्रहग्रथिता स्थितिरूपा । मनना च संकल्पविकल्पोल्लासरूपा सृष्टिः । एतद्रूपस्य देवीचतुष्टयस्य च "*उल्लासेन*" घस्मरसंवित्प्रवाहप्रवृत्त्या प्रथनेन "*सदैव*" सर्वकालं प्रत्येकं चातुरात्म्येनोद्योगाभासचर्वणालंग्रासवपुषा स्वस्वरूपावस्थितिर्पञ्चमपदातिशायिनी निरवकाशसंविन्निष्ठा स्थितेत्यर्थः । ।९

इत्यनेन सूत्रेण देवीचतुष्टयकथाक्रमं प्रकाश्य, इदानीं द्वादशवाहचक्ररहस्यं निरूप्यते

वऽउः द्वादशवाहोदयेन महामरीचिविकासः ।।

मनःसंहितं श्रोत्रादिबुद्धीन्द्रियपञ्चकं, तथा बुद्धिसंहितं वागादिकर्मेन्द्रियपञ्चकं, एतदुभयसमूहः "*द्वादशवाहः*" । तस्योल्लासोऽहेतुकेन केनाप्यतिविशृङ्खलतरधामनिरुत्तरनिस्तरङ्गपरस्वातन्त्र्यवृत्त्या घस्मरसंवित्प्रवाहः । तेन "*महामरीचीनाम्*" निरावरणक्रमेण प्रत्येकस्मिन्प्रवाहोद्योगावभासचर्वणालंग्रासविश्रान्तिरूपाणां महासंविद्रश्मीनां "*विकासः*" नियतानियतचिदचित्प्रथाविगलनेन नित्यविकस्वरस्वभावो महाप्रबोधः सततं अविनश्वरतया सर्वत्र सर्वतः सर्वदैव स्थितेति महावाक्यार्थः ।।

इत्यकरणसिद्धं सदैव निरावरणपदसमावेशं द्वादशवाहोदयदृशा प्रकाश्य, इदानीं चर्यापञ्चकसंप्रदायं निरूप्यन्ति

१०ः चर्यापञ्चकोदये निस्तरङ्गसमावेशः ।।

"*चर्यापञ्चकं*" त्वनाश्रितावधूतोन्मत्तसर्वभक्ष्यमहाव्यापकस्वरूपं । तस्योदयो नियतानियतशक्तिसमूहान्तरोदितो विकासस्वभावोल्लासः । तस्मिन्सति "*निस्तरङ्गसमावेशः*" आणवशाक्तशाम्भवोदयरूपसमस्ततरङ्गपरिवर्जितसमावेशलक्षणनिरुत्तरसमावेशधर्मैव प्रथतेत्यर्थः । चर्यापञ्चकक्रमं च वितत्य निरूपयामि । तत्रानाश्रिता निराधारत्वात्परमाकाशरूपा श्रोत्रसुषिरप्रदेशगमनेन स्वग्राह्यवस्तूपसंहरणायोद्गता । अवधूता चानियततया सर्वत्रविहरणदृक्शक्तिमार्गेण स्वसंहार्यस्वीकरणायोन्मिषिता । उन्मत्ता च विचित्तवत्स्वतन्त्रतया ग्राह्याग्राह्यसंबन्धाविवक्षया स्वविषयग्रहणाय प्रथिता । सर्वभक्ष्या
भक्ष्यसंस्कारनिखिलकवलनशीला स्वसंहार्यपदार्थग्रसनायोदिता । सर्वव्यापिका च
त्वग्वृत्तिगमनिकया निखिलव्यापकत्वादशेषस्पर्शस्वीकरणायोन्मिषिता; इति चर्यापञ्चकोदयः ।।

सततसिद्धचर्याक्रमं निरूप्य, इदानीं निर्निकेतपरज्ञानप्रकाशावलम्बनेन पुण्यपापनिवृत्तिकथां निरूपयन्ति

वऽउः महाबोधसमावेशात्पुण्यपापसंबन्धः ।।

"*महाबोधः*" च ज्ञातृज्ञानज्ञेयविकल्पसंकल्पकालुष्यनिर्मुक्तो निःशमशमानिकेतनिर्धामधामप्रथात्मकः परतरज्ञानस्वभावः क्रमाक्रमोत्तीर्णत्वान्महागुरुभिर्साक्षात्कृतः । तस्य "*समावेशः*" अकरणक्रमेण यथास्थितसंनिवेशेन त्यागस्वीकारपरिहारतः सततं अच्युतवृत्त्या तद्रूपेण स्फुरणं । तस्मात्"*महाबोधसमावेशत्*"
पुण्यपापयोर्शुभाशुभलक्षणकर्मणोर्द्वयोस्र्वफलद्वयवितरणशीलयोर्"*असंबन्धः*"
असंश्लेषोऽसंयोगश्चानवरतं जीवत एव वीरवरस्यापश्चिमजन्मनः कस्य चित्सर्वकालं अकृतकानुभवरसचर्वणसंतृप्तस्य भवभूमावेव बन्धमोक्षोभयोत्तीर्णमहामुक्तिर्
करतलामलकवत्स्थितेत्यर्थः ।।

स्वस्वरूपप्राप्तिपूर्वकं पुण्यपापतिरस्कारचर्चाक्रमं उक्त्वा, इदानीं स्वरसिद्धमौनकथां उद्घाटयन्ति

वऽउः अकथनकथाबलेन महाविस्मयमुद्राप्राप्त्या खस्वरता ।।

"*अकथनकथाबलं*" गुरुमुखोपदिष्टसंप्रदायक्रमेण मनागिह चर्च्यते । अस्य अकारस्य (१)हत(२)अनाहत(३)अनाहतहत(४)अनाहतहतोत्तीर्णतया चतुर्धोदितरूपस्य कथनं वक्त्राम्नायचर्चासंनिवेशनं इत्यकथनं । तत्र हतस्तावत्कथ्यते
हृत्कण्ठताल्वादिस्थानकरणसंनिवेशैर्हतोऽकारादिहकारपर्यन्तनानापदार्थावभासकः ।
अनाहतश्चास्वरमूलोल्लसितपरनादविस्फारस्तन्त्रीमध्यमास्वरसंकेतकोऽअकण्ठकूपान्तादुपचारतः
कृतप्रतिष्ठः । अनाहतहतश्चोभयाश्रितोन्मिषितोऽहतो विश्रान्तशष्कुलीश्रवणगोपनोद्भिन्नप्रथः श्रवणयुग्ममध्यवर्त्याकाशात्तत्त्वप्रतिबिम्बतत्त्वदेहतोऽपि हतोऽनाहतहतः । अनाहतहतोत्तीर्णश्च महानिरावरणधामसमुल्लसितो
ऽविकल्पः
ईषच्चलत्तात्मकमहास्पन्दप्रथमकोटिरूपः स्वरः
संकोचविकासविरहात्परमविकासरूपोऽस्पर्शधर्मानुच्चार्यमहामन्त्रप्रथात्मकः । तथा चानाहतहतोत्तीर्णो यः स शृङ्गाटकाकारो रौद्रीस्वभावस्तुर्यः । अनाहतहतश्चानच्चक्रकलात्मकवक्त्रसंस्थानो वामरूपः सुषुप्तः । अनाहतश्च बाहुरूपाम्बिकाशक्तिर्यागमे निरूपिता तत्स्वरूपः स्वप्नः । हतश्चायुधाकारो ज्येष्ठास्वभावो जाग्रत् । इत्येतच्चतुष्टयस्वभावस्याद्यवर्णस्य कथनं पारम्पर्यमुखयुक्तिविशेषः । तस्य बलं हतादिरूपत्रयोल्लसितानाहतहतोत्तीर्णरावस्फुरत्तारूपं वीर्यं तेन "*अकथनकथाबलेन*" । तत्रैवं अकथनं
वाक्प्रपञ्चोत्तीर्णं अकथनं एव कथनं संक्रमणक्रमेण निर्निकेतस्वरूपावधानं तदेव बलं
अकृतकस्फारसारं । तेन संक्रमणं च मनागिह वितन्यते ।
प्राणपुर्यष्टकशून्यप्रमातृनिविनिष्टाभिमानविगलनेन निस्तरङ्गप्रविकचच्चिद्धामबद्धास्पदो दैशिकवरो निःस्पन्दानन्दसुन्दरपरमशून्यदृग्बलेन कार्यकरणकर्मनिरपेक्षतया यद्यत्किं चित्सर्वगतात्मस्वरूपप्रतिपत्तावावलोकयति तत्तत्परतरचिन्मयं एव सततं भवति, इति नास्त्यत्र सन्देहः । तथा चान्यद्व्याख्यान्तरं आह कथनं तावत्षड्दर्शनचतुराम्नायमेलापक्रमसमूहेषु

पूजनक्रमोदितनियतानियतदेवताचक्रावलम्बनेन स्फुरति । इह पुनः पूज्यपूजकपूजनसंबन्धपरिहारेण श्रीमद्वातूलनाथादिसिद्धप्रवरवक्त्राम्नायदृशा सततसिद्धमहामरीचिविकासैव सर्वोत्तीर्णस्वरूपाविभिन्नः सर्वदैव सर्वत्र विराजते, इत्यकथनकथाबलं तेन
महाविस्मयप्राप्तिर्भवतीति संबन्धः । "*महाविस्मयः*" च विगतो विनष्टः स्मयो मितामिताहङ्कारदर्पः सर्वोल्लङ्घनवृत्त्या स्वरूपानुप्रवेशः । अथ च महाविस्मयः स्वपरभेदविस्मरणाज्झटिति निरन्तरनिरर्गलखेचरवृत्तिसमावेशः । सैव सर्वमुद्राणां क्रोडीकरणात्"*मुद्रा*" तस्या मौनपदसमावेशमयता । तया हेतुभूतया "*खस्वरता*" त्रयोदशकथाकथनसामरस्यात्मकः खस्वरस्तस्य भावः सामरस्यप्रथनं भवतीत्यर्थः । खस्वरस्तु खं अपि भावशून्यं अपि स्वेन राति व्याप्नोति स्वीकरोतीत्यादत्ते, इति खस्वरः ।।

षड्दर्शनचातुराम्नायिकसर्वमेलापकथात्रयोदशकथासाक्षात्कारोपदेशभङ्ग्यानुत्तरपदाद्वयतया
कस्यचिदवधूतस्य पीठेश्वरीभिर्महामेलापसमये सूत्रोपनिबद्धो वक्त्राम्नायः प्रकाशितः । तस्यैवेह मनाक्सतां अवबोधार्थं अस्माभिर्वृत्तिरियं कृतेति शिवं ।

इति परमरहस्यं वाग्विकल्पौघं उक्तं ।
भवविभवविभागभ्रान्तिमुक्तेन सम्यक् ।
कृतं अनुपमं उच्चैर्केन चिच्चिद्विकासात् ।
अकलितपरसत्तासाहसोल्लासवृत्त्या ।।

समाप्तोऽयं श्रीमद्वातूलनाथसूत्रवृत्तिः ।
कृतिर्श्रीमदनन्तशक्तिपादानां ।।

श्रीमत्प्रतापभूभर्तुराज्ञया प्रीतये सतां ।
मधुसूदनकौलेन संपद्येयं प्रकाशिता ।।